सालं,क्ली,(सालः प्रकारोऽस्त्यस्या इति । अच् । टाप् । ) गृहम् । इत्यमरटीकायां भरतः ॥

सालाकारी, स्त्री, युद्धे पराजितनारी । इति केचित् ॥

सालातुरीयः,पुं,पाणिनिमुनिः । इति हेमचन्द्रः॥ तालव्यशकारादिः साधुपाठः । यथा,—

"शालातुरीयशालङ्किदाक्षिपुत्त्राश्च पाणिनौ ।"

इति शब्दरत्नावली ॥

सालारं, क्ली, ( सालां रातीति । रा+कः । ) द्रव्यरक्षणार्थभित्तिस्थकीलकः । डाण्डा इति भाषा । इति केचित् ॥

सालावृकः, पुं, (सालाया वृक इव । ) कुक्कुरः । शृगालः । तरक्षुः । इति केचित् ॥ तालव्यशकारादिश्चायम् ॥

सालूरः, पुं, मण्डूकः । इति शब्दरत्नावली ॥ तालव्यशकारादिश्च ॥

सालेयः,पुं,मधुरिका । इत्यमरटीका ॥ तालव्यशकारादिश्च ॥

साल्वः,पुं,विष्णुवध्यराजविशेषः । इति हेमचन्द्रः स तु सौभदेशाधिपतिः । इति महाभारते कर्णपर्व्व ॥ देशविशेषः । तद्देशस्थे, पुं भूम्नि । तद्देशसम्बन्धिनि, त्रि ॥ तालव्यादिश्च ॥

साल्वहा, [ न् ] पुं, ( साल्वं हन्तीति । हन्+क्विप् । ) विष्णुः । इति हेमचन्द्रः ॥

साल्विकः,पुं,पक्षिविशेषः । सालिक इति भाषा यथा,—

"शवमक्षः क्षुद्रचुड़ो मूषलश्च साल्विकः ।"

इति शब्दचन्द्रिका ॥

सावकः, त्रि, शिशुः । इति केचित् ॥ तालव्यशकारादिः साधुपाठः ॥

सावधानः, त्रि, ( अवधानेन सह वर्त्तमानः । ) सचेतनः । सतर्कः । यथा, श्राद्धतत्त्वे ।

"आगच्छन्तु महाभागा विश्वेदेवा वरप्रदाः ।
ये चात्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥"

सावनं,क्ली,(सवनं सोमयज्ञस्नानं तस्येदमित्यण्) सवनसम्बन्धिदिनम् । यथा । सोमयागे सवनत्रयस्याहोरात्रसाध्यत्वात् तत्सम्बन्धि दिनं सावनम् । इति माधवाचार्य्यः ॥ अपि च । ब्रह्मसिद्धान्ते । सावनं दण्डाः षष्टिरहःस्वलग्नस्वगुणांशाख्यास्तद्दिनं भवेत् । इति मलमासतत्त्वम् ॥ ( यथाच सूर्य्यसिद्धान्ते ।

"उदयादुदयं भानोः सावनं तत् प्रकीर्त्तितम् ।
सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः ॥" )

सावनः, पुं, ( सवनस्यायमिति । अण् ) यज्ञकर्म्मान्तः । यजमानः । वरुणः । इति मेदिनी॥ दिवसविशेषः । यथा,—

"तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्त्तितः ।
अहोरात्रेण चैकेन सावनो दिवसः स्मृतः ॥"

इति मलमासतत्त्वम् ॥

मासभेदः । स च त्रिंशदहोरात्रात्मकः । यथा,

"त्रिंशता सौरदिवसैः सावनः परिकीर्त्तितः ।"

इति शब्दरत्नावली ॥

अपि च । ब्रह्मसिद्धान्ते ।

"चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः ।
एकराशौ रविर्यावत् कालं मासः स भास्करः ।
सर्व्वसंपरिवर्त्तैश्च नाक्षत्र इति चोच्यते ॥"

विष्णुधर्म्मोत्तरे च ।

"सन्निकर्षादथारभ्य सन्निकर्षमथापरम् ।
चन्द्रार्कयोर्बुधैर्म्मासश्चान्द्र इत्यभिधीयते ।
सावने च तथा मासि त्रिंशत्सूर्य्योदयाः स्मृताः ॥
आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तितः ।
सर्व्वसंपरिवर्त्तैश्च नाक्षत्र इति चोच्यते ॥" * ॥

सावनमासकर्त्तव्यकर्म्मादि यथा,—

"सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा ।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता ॥

पितामहः ।

"आब्दिके पितृकृत्ये च मासश्चान्द्रमसः स्मृतः ।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥"

अत्र आदिपदेन सवन्त्युतिवृत्तिप्रायश्चित्ताशुद्धाशौच-गर्भाधान-पुंसवन-सीमन्तोन्नयन-नामकरणान्नप्राशन-निष्क्रमण-चूड़ादिग्रहणम् । तथा च विष्णुधर्म्मोत्तरम् ।

"अध्यायनञ्च व्रतचारकर्म्म
सौरेण मानेन सदाभ्यसेत् ।
सत्राण्युपास्यान्यथ सावनेन
लोकस्य यत् स्याद्व्यवहारकर्म्म ॥"

इति मलमासतत्त्वम् ॥ * ॥

वर्षविशेषः । यथा,—

"सौरेणाब्दस्तु मानेन यदा भवति भार्गव ।
सावनेन च मानेन दिनषट्कं प्रपूर्य्यते ॥"

सौरसंवत्सरे दिनषट्काधिकः सावनः संवत्सरो भवतीति । इति मलमासतत्त्वम् ॥

सावरः,पुं,(सवराणामयमिति । अण् ।) लोध्रः । इत्यमरटीका शब्दरत्नावली च ॥ ( यथा, सुश्रुते । ४ । २२ ।

"शारिवोत्पलषड्ग्रन्थासावरागुरुचन्दनैः ॥" ) पापम् । अपराधः । इति विश्वः ॥ (मृगविशेषमांसे, क्ली । तस्य गुणा यथा,—

"सावरं पललं स्निग्धं शीतलं गुरु च स्मृतम् ।
रसे पाके च मधुरं कफदं रक्तपित्तहृत् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥) तालव्यशकारादिरप्ययम् ॥

सावर्णः,पुं, (सवर्ण एव । स्वार्थे अण् । सवर्णायाः छायाया अपत्यमिति अण् वा । ) अष्टममनुः । यथा,—

"छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः
पूर्व्वजस्य सवर्णोऽसौ सावर्णस्तेन कथ्यते ॥"

इति देवीभागवतम् ॥

( तथाच हरिवंशे । ९ । १९ ।

"पूर्व्वजस्य मनोस्तात सदृशोऽयमिति प्रभुः ।
मनुरेवाभवन्नाम्ना सावर्ण इति चोच्यते ॥" )

यथाच मात्स्ये । ९ । ३१—३३ ।

"सावर्णस्य प्रवक्ष्यामि मनोर्भाविं तथान्तरम् ।
अश्वत्थामा शरद्वांश्च कौशिको गालवस्तथा ॥
शतानन्दः काश्यपश्च रामश्च ऋषयः स्मृताः ।
धृतिर्व्वरीयान् यवसः सुवर्णो वृष्टिरेव च ॥
चरिष्णुरीड्यः सुमतिः वसुः शुभ्रश्च वीर्य्यवान् ।
भविष्या दशसावर्णा मनोः पुत्त्राः प्रकीर्त्तिताः ॥"

सावर्णलक्ष्यं,क्ली,(सावर्णस्य समानवर्णस्य पूर्व्वाकृतेरिति यावद् लक्ष्यं तस्मात् । ) चर्म्म । इति शब्दरत्नावली ॥

सावर्णिः, पुं, (सवर्णाया अपत्यमिति । इञ् । ) अष्टममनुः । स च सूर्य्यपुत्त्रः । यथा,—

"विवस्वतश्च द्वे जाये विश्वकर्म्मसुते उभे ।
संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव ॥
तृतीयां वड़वामेके तासां संज्ञासुतास्त्रयः ।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु ॥
सावर्णिस्तपती कन्या भार्य्या संवरणस्य या ।
शनैश्चरस्तृतीयोऽभूदश्विनौ वड़वात्मजौ ॥
अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः ।
निर्म्मोकविरजस्काद्याः सावर्णितनया नृप ॥
तत्र देवाः सुतपसो विरजा अमृतप्रभाः ।
तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति ॥
दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम् ।
राद्धमिन्द्रपदं हित्वा ततः सिद्धिमवाप्स्यति ॥
योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः ।
निवेशितोऽधिके स्वर्गादधुनास्ते स्वराड़िव
गालवो दीप्तिमान् रामो द्रोणपुत्त्रः कृपस्तथा ।
ऋष्यशृङ्गः पितास्माकं भगवान् वादरायणः ।
इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोगतः ॥
इदानीमासते राजन् स्वे स्वे आश्रममण्डले ।
देवगुह्यात् सरस्वत्यां सार्व्वभौम इति प्रभुः ।
स्थानं पुरन्दराद्धृत्वा बलये दास्यतीश्वरः ॥"

इति श्रीभागवते । ८ । १३ । ८—१७ ॥

( अस्य विशेषविवरणन्तु मार्कण्डेयपुराणे देवीमाहात्म्ये द्रष्टव्यम् ॥ ) गोत्रविशेषः । यथा । वात्स्यसावर्णिगोत्रयोरौर्व्वच्यवनभार्गवजामदग्न्याप्नुवत्प्रवराः । इत्युद्वाहतत्त्वम् ॥

सावित्रं, क्ली, (सविता देवता अस्येति । अण् । ) यज्ञोपवीतम् । इति शब्दरत्नावली ॥ ( तत्सम्बन्धिनि, त्रि । यथा, भागवते । ४।३१।१० ।

"किं जन्मभिस्त्रिभिर्व्वेह शौक्रसावित्रयाज्ञिकैः ।
कर्म्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा ॥" )

सावित्रः, पुं, ( सविता देवता अस्येति । अण् । ) ब्राह्मणः । इति हेमचन्द्रः ॥ शङ्करः । वसुः । इति मेदिनी ॥ (स्वार्थे अण् । ) सूर्य्यः । गर्भः । इति शब्दरत्नावली ॥ ( सवितुरपत्यं पुमान् । अण् । कर्णः । यथा, महाभारते । १।१३७। ८ ।

"सोऽब्रवीत् मेघगम्भीरस्वरेण वदतां वरः ।
भ्राता भ्रातरमज्ञातं सावित्रः पाकशासनिम् ॥"

सूर्य्यवंशीये, त्रि । यथा, उत्तरचरिते १ अङ्के ।

"यत् सावित्रैर्दीपितं भूमिपालै-
र्लोकश्रेष्ठैः साधु शुद्धं चरित्रम् ।
मत्सम्बन्धात् कश्मला किंवदन्ती
स्याच्चेदस्मिन् हन्त धिक् मामधन्यम् ॥"